श्री बगळामुखी हृदयं

श्री बगळामुखी हृदयं

ॐ अस्य श्रीबगळामुखीहृदयमालामंत्रस्य नारदऋषिः अनुष्टुप्छंदः श्रीबगळामुखी देवता ह्रीं बीजं क्लीं शक्तिः ऐं कीलकं श्री बगळामुखी प्रसाद सिद्ध्यर्थे जपे विनियोगः ||

अथ न्यासः |
ॐ नारदऋषये नमः शिरसि |
ॐ अनुष्टुप् छंदसे नमः मुखे |
ॐ श्रीबगळामुखी देवतायै नमः हृदये |
ॐ ह्रीं बीजाय नमः गुह्ये |
ॐ क्लीं शक्तये नमः पादयोः |
ॐ ऐं कीलकाय नमः सर्वांगे |

करन्यासः |
ॐ ह्रीं अंगुष्ठाभ्यां नमः |
ॐ क्लीं तर्जनीभ्यां नमः |
ॐ ऐं मध्यमाभ्यां नमः |
ॐ ह्रीं अनामिकाभ्यां नमः |
ॐ क्लीं कनिष्ठिकाभ्यां नमः |
ॐ ऐं करतलकरपृष्ठाभ्यां नमः |

अंगन्यासः |
ॐ ह्रीं हृदयाय नमः |
ॐ क्लीं शिरसे स्वाहा |
ॐ ऐं शिखायै वषट् |
ॐ ह्रीं कवचाय हुं |
ॐ क्लीं नेत्रत्रयाय वौषट् |
ॐ ऐं अस्त्राय फट् |
ॐ ह्रीं क्लीं ऐं भूर्भुवस्सुवरोमिति दिग्बंधः ||

ध्यानं |
पीतांबरां पीतमाल्यां पीताभरणभूषितां |
पीतकंजपदद्वंद्वां बगळां चिंतयेऽनिशं | |

इति ध्यात्वा पंचमुद्रया संपूज्य | |

पीतशंखगदाहस्ते पीतचंदनचर्चिते |
बगळे मे वरं देहि शत्रुसंघविदारिणी | |

संप्रार्थ्य | |

ॐ ह्लीं क्लीं ऐं बगळामुख्यै गदाधारिण्यै प्रेतासनाध्यासिन्यै स्वाहा | |

इति मंत्रं जपित्वा पुनः पूर्ववद्धृदयादि षडंगन्यासं कृत्वा
स्तोत्रं पठेत् | |

करन्यासः |
ॐ ह्लीं अंगुष्ठाभ्यां नमः |
ॐ क्लीं तर्जनीभ्यां नमः |
ॐ ऐं मध्यमाभ्यां नमः |
ॐ ह्लीं अनामिकाभ्यां नमः |
ॐ क्लीं कनिष्ठिकाभ्यां नमः |
ॐ ऐं करतल करपृष्ठाभ्यां नमः |

अंगन्यासः |
ॐ ह्लीं हृदयाय नमः |
ॐ क्लीं शिरसे स्वाहा |
ॐ ऐं शिखायै वषट् |
ॐ ह्लीं कवचाय हुं |
ॐ क्लीं नेत्रत्रयाय वौषट् |
ॐ ऐं अस्त्रायफट् |
ॐ ह्लीं क्लीं ऐं भूर्भुवस्सुवरोमिति दिग्विमोकः | |

वंदेऽहं बगळां देवीं पीतभूषणभूषितां |
तेजोरूपमयीं देवीं पीततेजस्स्वरूपिणीं | | 1 | |

गदाभ्रमणाभिन्नाभ्रां भ्रुकुटीभीषणाननां |
भीषयंतीं भीमशत्रून् भजे भक्तस्य भव्यदां || 2 ||

पूर्णचंद्रसमानास्यां पीतगंधानुलेपनां |
पीतांबरपरीधानां पवित्रामाश्रयाम्यहं || 3 ||

पालयंतीमनुपलं प्रसमीक्ष्यावनीतले |
पीताचाररतां भक्तां तां भवानीं भजाम्यहं || 4 ||

पीतपद्मपदद्वंद्वां चंपकारण्यवासिनीं |
पीतावतंसां परमां वंदे पद्मजवंदितां || 5 ||

लसच्चारुसिंजत्सुमंजीरपादां
चलत्स्वर्णकर्णावतंसांचितास्यां |
वलत्पीतचंद्राननां चंद्रवंद्यां
भजे पद्मजादीड्यसत्पादपद्मां || 6 ||

सुपीताभयामालया पूतमंत्रं
परं ते जपंतो जयं सल्लभंते |
रणे रागरोषाप्लुतानां रिपूणां
विवादे बलाद्वैरकृद्धातमातः || 7 ||

भरत्पीतभास्वत्प्रभाहस्कराभां
गदागंजितामित्रगर्वां गरिष्ठां |
गरीयो गुणागार गात्रां गुणाढ्यां
गणेशादिगम्यां श्रये निर्गुणाढ्यां || 8 ||

जना ये जपंत्युग्रबीजं जगत्सु
परं प्रत्यहं ते स्मरंतः स्वरूपं |
भवेद्वादिनां वाङ्मुखस्तंभ आद्ये
जयो जायते जल्पतामाशु तेषां || 9 ||

तव ध्याननिष्ठा प्रतिष्ठात्मप्रज्ञा-
वतां पादपद्मार्चने प्रेमयुक्ताः |
प्रसन्ना नृपाः प्राकृताः पंडिता वा
पुराणादिगाधासुतुल्या भवंति || 10 ||

नमामस्ते मातः कनककमनीयांघ्रि जलजं
बलद्विद्युद्वर्णां घनतिमिर विध्वंस करणं |
भवाब्धौ मग्नात्मोत्तरणकरणं सर्वशरणं
प्रपन्नानां मातर्जगति बगळे दुःखदमनं || 11 ||

ज्वलज्ज्योत्स्नारत्नाकरमणिविषक्तांकभवनं
स्मरामस्ते धाम स्मरहरहरींद्रेंदु प्रमुखैः |
अहोरात्रं प्रातः प्रणयनवनीयं सुविशदं
परं पीताकारं परिचितमणिद्वीपवसनं || 12 ||

वदामस्ते मातः श्रुतिसुखकरं नाम ललितं
लसन्मात्रावर्णं जगति बगळेति प्रचरितं |
चलंतस्तिष्ठंतो वयमुपविशंतोऽपि शयने
भजामो यच्छ्रेयो दिवि दुरवलभ्यं दिविषदां || 13 ||

पदार्चायां प्रीतिः प्रतिदिनमपूर्वा प्रभवतु
यथा ते प्रासन्न्यं प्रतिफलमपेक्ष्यं प्रणमतां |
अनल्पं तन्मातर्भवति भृतभक्त्या भवतु नो
दिशातः सद्भक्तिं भुवि भगवतां भूरि भवदां || 14 ||

मम सकलरिपूणां वाङ्मुखे स्तंभयाशु
भगवति रिपुजिह्वां कीलय प्रस्थतुल्यां |
व्यवसितखलबुद्धिं नाशयाशु प्रगल्भां
मम कुरु बहुकार्यं सत्कृपेऽंब प्रसीद || 15 ||

व्रजतु मम रिपूणां सद्मनि प्रेतसंस्था
करधृतगदया तान् घातयित्वाशु रोषात् |
सधन वसन धान्यं सद्म तेषां प्रदह्य
पुनरपि बगळा स्वस्थानमायातु शीघ्रं || 16 ||

करधृतरिपु जिह्वापीडन व्यग्रहस्तां
पुनरपि गदया तांस्ताडयंतीं सुतंत्रां |
प्रणतसुरगणानां पालिकां पीतवस्त्रां
बहुबल बगळां तां पीतवस्त्रां नमामः || 17 ||

हृदयवचनकायैः कुर्वतां भक्तिपुंजं
प्रकटित करुणार्द्रां प्रीणतीजल्पतीति |
धनमथ बहुधान्यं पुत्रपौत्रादिवृद्धिः
सकलमपि किमेभ्यो देयमेवं त्ववश्यं || 18 ||

तव चरणसरोजं सर्वदा सेव्यमानं
द्रुहिणहरिहराद्यैर्देवबृंदैः शरण्यं |
मृदुलमपि शरणं ते शर्मदं सूरिसेव्यं
वयमिह करवामो मातरेतद्विधेयं || 19 ||

बगळाहृदयस्तोत्रमिदं भक्ति समन्वितः |
पठेद्यो बगळा तस्य प्रसन्ना पाठतो भवेत् || 20 ||

पीताध्यानपरो भक्तो यः शृणोत्यविकल्पतः |
निष्कल्मषो भवेन्मर्त्यो मृतो मोक्षमवाप्नुयात् || 21 ||

आश्विनस्य सिते पक्षे महाष्टम्यां दिवानिशं |
यस्त्विदं पठते प्रेम्णा बगळा प्रीतिमेति सः || 22 ||

देव्यालये पठन् मर्त्यो बगळां ध्यायतीश्वरीं |
पीतवस्त्रावृतो यस्तु तस्य नश्यंति शत्रवः || 23 ||

पीताचाररतो नित्यं पीतभूषां विचिंतयन् |
बगळायाः पठेन्नित्यं हृदयस्तोत्रमुत्तमं || 24 ||

न किंचिद् दुर्लभं तस्य दृश्यते जगतीतले |
शत्रवो ग्लानिमायांति तस्य दर्शनमात्रतः || 25 ||

इति सिद्धेश्वरतंत्रे उत्तरखंडे श्री बगळापटले श्रीबगळाहृदयस्तोत्रं ||